श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८४

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ८४

*सूर्यग्रहणयात्रावर्णनम्*

क्वचिदथ तपनोपरागकाले
  पुरि निदधत् कृतवर्मकामसूनू।
यदुकुलमहिलावृतः सुतीर्थं
  समुपगतोऽसि समन्तपञ्चकाख्यम्॥ १ ॥

बहुतरजनताहिताय तत्र
  त्वमपि पुनन् विनिमज्य तीर्थतोयम्।
द्विजगणपरिमुक्तवित्तराशिः
  सममिलथाः कुरुपाण्डवादिमित्रैः॥ २ ॥

तव खलु दयिताजनैः समेता
  द्रुपदसुता त्वयि गाढभक्तिभारा।
तदुदितभवदाहृतिप्रकारैः
  अतिमुमुदे सममन्यभामिनीभिः॥ ३ ॥

तदनु च भगवन् निरीक्ष्य गोपा-
  नतिकुतुकादुपगम्य मानयित्वा।
चिरतरविरहातुराङ्गरेखाः
  पशुपवधूः सरसं त्वमन्वयासीः॥ ४ ॥

सपदि च भवदीक्षणोत्सवेन
  प्रमुषितमानहृदां नितम्बिनीनाम्।
अतिरसपरिमुक्तकञ्चुलीके
  परिचयहृद्यतरे कुचे न्यलैषीः॥ ५ ॥

www.prapatti.com

रिपुजनकलहैः पुनः पुनर्मे
  समुपगतैरियती विलम्बनाऽभूत्।
इति कृतपरिरम्भणे त्वयि द्रा-
  गतिविवशा खलु राधिका निलिल्ये॥ ६ ॥

अपगतविरहव्यथास्तदा ता
  रहसि विधाय ददाथ तत्त्वबोधम्।
परमसुखचिदात्मकोऽहमात्मे-
  त्युदयतु वः स्फुटमेव चेतसीति॥ ७ ॥

सुखरसपरिमिश्रितो वियोगः
  किमपि पुराऽभवदुद्धवोपदेशैः।
समभवदमुतः परं तु तासां
  परमसुखैक्यमयी भवद्विचिन्ता॥ ८ ॥

मुनिवरनिवहैस्तवाथ पित्रा
  दुरितशमाय शुभानि पृच्छ्यमानैः।
त्वयि सति किमिदं शुभान्तरैरि-
  त्युरुहसितैरपि याजितस्तदाऽसौ॥ ९ ॥

सुमहति यजने वितायमाने
  प्रमुदितमित्रजने सहैव गोपाः।
यदुजनमहितास्त्रिमासमात्रं
  भवदनुषङ्गरसं पुरेव भेजुः॥ १० ॥

व्यपगमसमये समेत्य राधां
  दृढमुपगूह्य निरीक्ष्य वीतखेदाम्।
प्रमुदितहृदयः पुरं प्रयातः
  पवनपुरेश्वर पाहि मां गदेभ्यः॥ ११ ॥

**********



www.prapatti.com